# Numo Vedavanim

# નુમો વેદવાણીમ્

## Document Information

Text title : Vedavanim Numah

File name : numovedavANIm.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Dr. Ramakant Shukla

Acknowledge-Permission: Sanskrit Maitri https://www.youtube.com/@SanskritMaitri/videos

Latest update : July 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

# નુમો વેદવાણીમ્

પશ્ય દેવસ્ય કાવ્યં યદાસ્તેઽમૃતં
    યજ્જરાબાધિતં નો ભવેજ્જાતુચિત્ ।
અસ્ય સંજ્ઞાસ્તિ વેદઃ સદા પાવનીં
    વેદવાણીં નુમો વેદવાણીં નુમઃ ॥ ૧॥

અસ્તિ માતા મદીયા ધરેયં તથૈ
    વાસ્મ્યહં તત્સુતસ્તત્સપર્યાપરઃ ।
ઘોષણેયં યદીયાસ્તિ તાં પાવનીં
    વેદવાણીં નુમો વેદવાણીં નુમઃ ॥ ૨॥

રાષ્ટ્રમાસ્તાં સુપુષ્ટં સમૃદ્ધં સદા
    ત્યાગભોગૌ સખાયૌ ભવેતાં તથા ।
દેશનેયં યદીયાસ્તિ તાં પાવનીં
    વેદવાણીં નુમો વેદવાણીં નુમઃ ॥ ૩॥

વારિવાહઃ સુકાલે સમાગચ્છતાત્
    સન્તુગાવશ્ચ પુષ્ટાઃ રામસ્તાસ્તથા ।
માર્ગણેયં યદીયાસ્તિ તાં પાવનીં
    વેદવાણીં નુમો વેદવાણીં નુમઃ ॥ ૪॥

મા જલાનાં તરુણાં ચ હિંસા કુરુ
    દ્યુતખેલાં પરિત્યજ્ય કર્ષં કુરુ ।
માનવં યા દિશન્તી શ્રુતિં તાં મુદા
    વેદવાણીં નુમો વેદવાણીં નુમઃ ॥ ૫॥

"નૈકધર્માસ્તથાનેકવાચો નરા
    માતરં ભૂમિમેનાં સદા રક્ષત ।"
રાષ્ટ્રિયાં વૈશ્વિકીમેકતાં તન્વતીં
    વેદવાણીં નુમો વેદવાણીં નુમઃ ॥ ૬॥

-ડૉ રમાકાન્ત શુક્લ

*Numo Vedavanim*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*